# ब्रह्मसूत्रम्

**Edited by**

asit k panja

kamal kumar

# ब्रह्मसूत्रम्

(brahmasūtram)

Edited by

asit k panja

&

Kamal kumar

aarsha, jaipur

Plot no. 4, Khandelwal nagar Extn,
Near Premnagar pulia, Agra Road,
Jaipur- 302031, Rajasthan

www.ayurvedah.in

**Publisher** : **aarsha**

**Edition** : **First; March 2014**

**ISBN** :

**Price** : **FREE**

Composing and editing: **bapan neogi**

Cover page: **Rajarshi**

For any information, feedback and requirement of this book, please mail to :

aarshaayurveda@gmail.com www.ayurvedah.in

Published by **bapan neogi** on behalf of **aarsha** ,

**aarsha, jaipur**
**Plot no. 4, Khandelwal nagar Extn,**
**Near Premnagar pulia, Agra Road,**
**Jaipur- 302031, Rajasthan**

www.ayurvedah.in

# ब्रह्मसूत्रम्

## प्रथम अध्याय ( समन्वय )

### अध्याय १: पाद-१

अथातो ब्रह्मजिज्ञासा । ( १,१.१ )

जन्माद्यस्य यतः । ( १,१.२ )

शास्त्रयोनित्वात्। ( १,१.३ )

तत्तु समन्वयात्। ( १,१.४ )

ईक्षतेर्नाशब्दम् । ( १,१.५ )

गौणश्चेन्नात्मशब्दात्। ( १,१.६ )

तन्निष्ठस्य मोक्षोपदेशात्। ( १,१.७ )

हेयत्वावचनाच्च । ( १,१.८ )

प्रतिज्ञाविरोधात्। ( १,१.९ )

स्वाप्ययात्। ( १,१.१० )

गतिसामान्यात्। ( १,१.११ )

श्रुतत्वाच्च । ( १,१.१२ )

आनन्दमयोऽभ्यासात्। ( १,१.१३ )

विकारशब्दान्नेति चेन्न प्राचुर्यात्। ( १,१.१४ )

तद्धेतुव्यपदेशाच्च । ( १,१.१५ )

www.ayurvedah.in

**मान्त्रवर्णिकमेव च गीयते । ( १,१.१६ )**

**नेतरोऽनुपपत्तेः । ( १,१.१७ )**

**भेदव्यपदेशाच्च । ( १,१.१८ )**

**कामाच्च नानुमानापेक्षा । ( १,१.१९ )**

**अस्मिन्नस्य च तद्योगं शास्ति । ( १,१.२० )**

**अन्तस्तद्धर्मोपदेशात्। ( १,१.२१ )**

**भेदव्यपदेशाच्चान्यः । ( १,१.२२ )**

**आकाशस्तल्लिङ्गात्। ( १,१.२३ )**

**अत एव प्राणः । ( १,१.२४ )**

**ज्योतिश्चरणाभिधानात्। ( १,१.२५ )**

**छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात्तथा हि दर्शनम् । ( १,१.२६ )**

**भूतादिपादव्यपदेशोपपत्तेश्चैवम् । ( १,१.२७ )**

**उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात्। ( १,१.२८ )**

**प्राणस्तथानुगमात्। ( १,१.२९ )**

**न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन्। ( १,१.३० )**

**शास्त्रदृष्ट्या तूपदेशो वामदेववत्। ( १,१.३१ )**

**जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्।**

**( १,१.३२ )**

## अध्याय १: पाद-२

सर्वत्र प्रसिद्धोपदेशात्। ( १,२.१ )

विवक्षितगुणोपपत्तेश्च । ( १,२.२ )

अनुपपत्तेस्तु न शारीरः । ( १,२.३ )

कर्मकर्तृव्यपदेशाच्च । ( १,२.४ )

शब्दविशेषात्। ( १,२.५ )

स्मृतेश्च । ( १,२.६ )

अर्भकौस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च । ( १,२.७ )

संभोगप्राप्तिरिति चेन्न वैशेष्यात्। ( १,२.८ )

अत्ता चराचरग्रहणात्। ( १,२.९ )

प्रकरणाच्च । ( १,२.१० )

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्। ( १,२.११ )

विशेषणाच्च । ( १,२.१२ )

अन्तर उपपत्तेः । ( १,२.१३ )

स्थानादिव्यपदेशाच्च । ( १,२.१४ )

सुखविशिष्टाभिधानादेव च । ( १,२.१५ )

अत एव च स ब्रह्म । ( १,२.१६ )

www.ayurvedah.in

श्रुतोपनिषत्कगत्यभिधानाच्च । ( १,२.१७ )

अनवस्थितेरसंभवाच्च नेतरः । ( १,२.१८ )

अन्तर्याम्यधिदैवाधिलोकादिषु तद्धर्मव्यपदेशात्। ( १,२.१९ )

न च स्मार्तमतद्धर्माभिलापाच्छारीरश्च । ( १,२.२० )

उभयेऽपि हि भेदेनैनमधीयते । ( १,२.२१ )

अदृश्यत्वादिगुणको धर्मोक्तेः । ( १,२.२२ )

विशेषणभेदव्यपदेशाभ्यां च नेतरौ । ( १,२.२३ )

रूपोपन्यासाच्च । ( १,२.२४ )

वैश्वानरः साधारणशब्दविशेषात्। ( १,२.२५ )

स्मर्यमाणमनुमानं स्यादिति । ( १,२.२६ )

शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च नेति चेन्न तथा

दृष्ट्युपदेशादसम्भवात्पुरुषमपि चैनमधीयते । ( १,२.२७ )

अत एव न देवता भूतं च । ( १,२.२८ )

साक्षादप्यविरोधं जैमिनिः । ( १,२.२९ )

अभिव्यक्तेरित्याश्मरथ्यः । ( १,२.३० )

अनुस्मृतेर्बादरिः । ( १,२.३१ )

संपत्तेरिति जैमिनिस्तथा हि दर्शयति । ( १,२.३२ )

आमनन्ति चैनमस्मिन्। ( १,२.३३ )

## अध्याय १: पाद-३

द्युभ्वाद्यायतनं स्वशब्दात्। ( १,३.१ )

मुक्तोपसृप्यव्यपदेशाच्च । ( १,३.२ )

नानुमानमतच्छब्दात्प्राणभृच्च । ( १,३.३ )

भेदव्यपदेशात्। ( १,३.४ )

प्रकरणात्। ( १,३.५ )

स्थित्यदनाभ्यां च । ( १,३.६ )

भूमा संप्रसादादध्युपदेशात्। ( १,३.७ )

धर्मोपपत्तेश्च । ( १,३.८ )

अक्षरमम्बरान्तधृतेः । ( १,३.९ )

सा च प्रशासनात्। ( १,३.१० )

अन्यभावव्यावृत्तेश्च । ( १,३.११ )

ईक्षतिकर्मव्यपदेशात्सः । ( १,३.१२ )

दहर उत्तरेभ्यः । ( १,३.१३ )

गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च । ( १,३.१४ )

धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः । ( १,३.१५ )

प्रसिद्धेश्च । ( १,३.१६ )

www.ayurvedah.in

इतरपरामर्शात्स इति चेन्नासंभवात्। ( १,३.१७ )

उत्तराच्चेदाविर्भूतस्वरूपस्तु । ( १,३.१८ )

अन्यार्थश्च परामर्शः । ( १,३.१९ )

अल्पश्रुतेरिति चेत्तदुक्तम् । ( १,३.२० )

अनुकृतेस्तस्य च । ( १,३.२१ )

अपि च स्मर्यते । ( १,३.२२ )

शब्दादेव प्रमितः । ( १,३.२३ )

हृद्यपेक्षया तु मनुष्याधिकारत्वात्। ( १,३.२४ )

तदुपर्यपि बादरायणः संभवात्। ( १,३.२५ )

विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्। ( १,३.२६ )

शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम् । ( १,३.२७ )

अत एव च नित्यत्वम् । ( १,३.२८ )

समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च । ( १,३.२९ )

मध्वादिष्वसंभवादनधिकारं जैमिनिः । ( १,३.३० )

ज्योतिषि भावाच्च । ( १,३.३१ )

भावं तु बादरायणोऽस्ति हि । ( १,३.३२ )

शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि । ( १,३.३३)

क्षत्रियत्वगतेश्च । ( १,३.३४ )

www.ayurvedah.in

उत्तरत्र चैत्ररथेन लिङ्गात्। ( १,३.३५ )

संस्कारपरामर्शात्तदभावाभिलापाच्च । ( १,३.३६ )

तदभावनिर्धारणे च प्रवृत्तेः । ( १,३.३७ )

श्रवणाध्ययनार्थप्रतिषेधात्। ( १,३.३८ )

स्मृतेश्च । ( १,३.३९ )

कम्पनात्। ( १,३.४० )

ज्योतिर्दर्शनात्। ( १,३.४१ )

आकाशोऽर्थान्तरत्वादिव्यपदेशात्। ( १,३.४२ )

सुषुप्त्युत्क्रान्त्योर्भेदेन । ( १,३.४३ )

पत्यादिशब्देभ्यः । ( १,३.४४ )

www.ayurvedah.in

## अध्याय १: पाद-४

आनुमानिकमप्येकेषामिति चेन्न शरीर-रूपक-विन्यस्त-गृहीतेर्दर्शयति च । ( १,४.१ )

सूक्ष्मं तु तदर्हत्वात्। ( १,४.२ )

तदधीनत्वादर्थवत्। ( १,४.३ )

ज्ञेयत्वावचनाच्च । ( १,४.४ )

वदतीति चेन्न प्राज्ञो हि प्रकरणात्। ( १,४.५ )

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च । ( १,४.६ )

महद्वच्च । ( १,४.७ )

चमसवदविशेषात्। ( १,४.८ )

ज्योतिरुपक्रमा तु तथा ह्यधीयत एके । ( १,४.९ )

कल्पनोपदेशाच्च मध्वादिवदविरोधः । ( १,४.१० )

न संख्योपसंग्रहादपि ज्ञानाभावादतिरेकाच्च । ( १,४.११ )

प्राणादयो वाक्यशेषात्। ( १,४.१२ )

ज्योतिषैकेषामसत्यन्ने । ( १,४.१३ )

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः । ( १,४.१४ )

समाकर्षात्। ( १,४.१५ )

जगद्वाचित्वात्। ( १,४.१६ )

जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम् । ( १,४.१७ )

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके । ( १,४.१८ )

वाक्यान्वयात्। ( १,४.१९ )

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः । ( १,४.२० )

उत्क्रमिष्यत एवं भावादित्यौडुलोमिः । ( १,४.२१ )

अवस्थितेरिति काशकृत्स्नः । ( १,४.२२ )

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्। ( १,४.२३ )

अभिध्योपदेशाच्च । ( १,४.२४ )

साक्षाच्चोभयाम्नानात्। ( १,४.२५ )

आत्मकृतेः । ( १,४.२६ )

परिणामात्। ( १,४.२७ )

योनिश्च हि गीयते । ( १,४.२८ )

एतेन सर्वे व्याख्याता व्याख्याता ।

www.ayurvedah.in

# द्वितीय अध्याय ( अविरोध )

## अध्याय २: पाद-२

स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात्। ( २,१.१ )

इतरेषां चानुपलब्धेः । ( २,१.२ )

एतेन योगः प्रत्युक्तः । ( २,१.३ )

न विलक्षणत्वादस्य तथात्वं च शब्दात्। ( २,१.४ )

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् । ( २,१.५ )

दृश्यते तु । ( २,१.६ )

असदिति चेन्न प्रतिषेधमात्रत्वात्। ( २,१.७ )

अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् । ( २,१.८ )

न तु दृष्टान्तभावात्। ( २,१.९ )

स्वपक्षदोषाच्च । ( २,१.१० )

तर्काप्रतिष्ठानादपि । ( २,१.११ )

अन्यथानुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः । ( २,१.१२ )

एतेन शिष्टापरिग्रहा अपि व्याख्याताः । ( २,१.१३ )

भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्। ( २,१.१४ )

तदनन्यत्वमारम्भणशब्दादिभ्यः । ( २,१.१५ )

भावे चोपलब्धेः । ( २,१.१६ )

सत्वाच्चापरस्य । ( २,१.१७ )

असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषाद्युक्तेः शब्दान्तराच्च । ( २,१.१८ )

पटवच्च । ( २,१.१९ )

यथा च प्राणादिः । ( २,१.२० )

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः । ( २,१.२१ )

अधिकं तु भेदनिर्देशात्। ( २,१.२२ )

अश्मादिवच्च तदनुपपत्तिः । ( २,१.२३ )

उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि । ( २,१.२४ )

देवादिवदपि लोके । ( २,१.२५ )

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा । ( २,१.२६ )

श्रुतेस्तु शब्दमूलत्वात्। ( २,१.२७ )

आत्मनि चैवं विचित्राश्च हि । ( २,१.२८ )

स्वपक्षदोषाच्च । ( २,१.२९ )

सर्वोपेता च तद्दर्शनात्। ( २,१.३० )

विकरणत्वान्नेति चेत्तदुक्तम् । ( २,१.३१ )

न प्रयोजनवत्त्वात्। ( २,१.३२ )

लोकवत्तु लीलाकैवल्यम् । ( २,१.३३ )

www.ayurvedah.in

**वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति । ( २,१.३४ )**

**न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च । ( २,१.३५ )**

**सर्वधर्मोपपत्तेश्च । ( २,१.३६ )**

www.ayurvedah.in

## अध्याय २: पाद-२

रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च । ( २,२.१ )

पयोऽम्बुवच्चेत्तत्रापि । ( २,२.२ )

व्यतिरेकानवस्थितेश्चानपेक्षत्वात्। ( २,२.३ )

अन्यत्राभावाच्च न तृणादिवत्। ( २,२.४ )

पुरुषाश्मवदिति चेत्तथापि । ( २,२.५ )

अङ्गित्वानुपपत्तेश्च । ( २,२.६ )

अन्यथानुमितौ च ज्ञशक्तिवियोगात्। ( २,२.७ )

अभ्युपगमेऽप्यर्थाभावात्। ( २,२.८ )

विप्रतिषेधाच्चासमञ्जसम् । ( २,२.९ )

महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् । ( २,२.१० )

उभयथापि न कर्मातस्तदभावः । ( २,२.११ )

समवायाभ्युपगमाच्च साम्यादनवस्थितेः । ( २,२.१२ )

नित्यमेव च भावात्। ( २,२.१३ )

रूपादिमत्त्वाच्च विपर्ययो दर्शनात्। ( २,२.१४ )

उभयथा च दोषात्। ( २,२.१५ )

अपरिग्रहाच्चात्यन्तमनपेक्षा । ( २,२.१६ )

समुदाय उभयहेतुकेऽपि तदप्राप्तिः । ( २,२.१७ )

इतरेतरप्रत्ययत्वादुपपन्नमिति चेन्न सङ्घातभावानिमित्तत्वात्। ( २,२.१८ )

उत्तरोत्पादे च पूर्वनिरोधात्। ( २,२.१९ )

असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा । ( २,२.२० )

प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्। ( २,२.२१ )

उभयथा च दोषात्। ( २,२.२२ )

आकाशे चाविशेषात्। ( २,२.२३ )

अनुस्मृतेश्च । ( २,२.२४ )

नासतोऽदृष्टत्वात्। ( २,२.२५ )

उदासीनानामपि चैवं सिद्धिः । ( २,२.२६ )

नाभाव उपलब्धेः । ( २,२.२७ )

वैधर्म्याच्च न स्वप्नादिवत्। ( २,२.२८ )

न भावोऽनुपलब्धेः । ( २,२.२९ )

सर्वथानुपपत्तेश्च । ( २,२.३० )

नैकस्मिन्नसम्भवात्। ( २,२.३१ )

एवं चात्माकार्त्स्न्यम् । ( २,२.३२ )

न च पर्यायादप्यविरोधो विकारादिभ्यः । ( २,२.३३ )

अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः । ( २,२.३४ )

पत्युरसामञ्जस्यात्। ( २,२.३५ )

अधिष्ठानानुपपत्तेश्च । ( २,२.३६ )

करणवच्चेन्न भोगादिभ्यः । ( २,२.३७ )

अन्तवत्त्वमसर्वज्ञता वा । ( २,२.३८ )

उत्पत्त्यसंभवात्। ( २,२.३९ )

न च कर्तुः करणम् । ( २,२.४० )

विज्ञानादिभावे वा तदप्रतिषेधः । ( २,२.४१ )

विप्रतिषेधाच्च । ( २,२.४२ )

www.ayurvedah.in

## अध्याय २: पाद-३

न वियदश्रुतेः । ( २,३.१ )

अस्ति तु । ( २,३.२ )

गौण्यसंभवाच्छब्दाच्च । ( २,३.३ )

स्याच्चैकस्य ब्रह्मशब्दवत्। ( २,३.४ )

प्रतिज्ञाहानिरव्यतिरेकात्। ( २,३.५ )

शब्देभ्यः । ( २,३.६ )

यावद्विकारं तु विभागो लोकवत्। ( २,३.७ )

एतेन मातरिश्वा व्याख्यातः । ( २,३.८ )

असंभवस्तु सतोऽनुपपत्तेः । ( २,३.९ )

तेजोऽतस्तथा ह्याह । ( २,३.१० )

आपः । ( २,३.११ )

पृथिवी । ( २,३.१२ )

अधिकाररूपशब्दान्तरेभ्यः । ( २,३.१३ )

तदभिध्यानादेव तु तल्लिङ्गात्सः । ( २,३.१४ )

विपर्ययेण तु क्रमोऽत उपपद्यते च । ( २,३.१५ )

अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात्। ( २,३.१६ )

चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्। ( २,३.१७ )

नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः । ( २,३.१८ )

ज्ञोऽत एव । ( २,३.१९ )

उत्क्रान्तिगत्यागतीनाम् । ( २,३.२० )

स्वात्मना चोत्तरयोः । ( २,३.२१ )

नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्। ( २,३.२२ )

स्वशब्दोन्मानाभ्यां च । ( २,३.२३ )

अविरोधश्चन्दनवत्। ( २,३.२४ )

अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि । ( २,३.२५ )

गुणाद्वा लोकवत्। ( २,३.२६ )

व्यतिरेको गन्धवत्तथा हि दर्शयति । ( २,३.२७ )

पृथगुपदेशात्। ( २,३.२८ )

तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्। ( २,३.२९ )

यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्। ( २,३.३० )

पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात्। ( २,३.३१ )

नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वान्यथा । ( २,३.३२ )

कर्ता शास्त्रार्थवत्त्वात्। ( २,३.३३ )

उपादानाद्विहारोपदेशाच्च । ( २,३.३४ )

www.ayurvedah.in

**व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः । ( २,३.३५ )**

**उपलब्धिवदनियमः । ( २,३.३६ )**

**शक्तिविपर्ययात्। ( २,३.३७ )**

**समाध्यभावाच्च । ( २,३.३८ )**

**यथा च तक्षोभयथा । ( २,३.३९ )**

**परात्तु तच्छ्रुतेः । ( २,३.४० )**

**कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः । ( २,३.४१ )**

**अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके । ( २,३.४२ )**

**मन्त्रवर्णात्। ( २,३.४३ )**

**अपि स्मर्यते । ( २,३.४४ )**

**प्रकाशादिवत्तु नैवं परः । ( २,३.४५ )**

**स्मरन्ति च । ( २,३.४६ )**

**अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत्। ( २,३.४७ )**

**असन्ततेश्चाव्यतिकरः । ( २,३.४८ )**

**आभास एव च । ( २,३.४९ )**

**अदृष्टानियमात्। ( २,३.५० )**

**अभिसन्ध्यादिष्वपि चैवम् । ( २,३.५१ )**

**प्रदेशभेदादिति चेन्नान्तर्भावात्। ( २,३.५२ )**

www.ayurvedah.in

## अध्याय २: पाद-४

तथा प्राणाः । ( २,४.१ )

गौण्यसंभवात्तत्प्राक् श्रुतेश्च । ( २,४.२ )

तत्पूर्वकत्वाद्वाचः । ( २,४.३ )

सप्त गतेर्विशेषितत्वाच्च । ( २,४.४ )

हस्तादयस्तु स्थितेऽतो नैवम् । ( २,४.५ )

अणवश्च । ( २,४.६ )

श्रेष्ठश्च । ( २,४.७ )

न वायुक्रिये पृथगुपदेशात्। ( २,४.८ )

चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः । ( २,४.९ )

अकरणत्वाच्च न दोषस्तथा हि दर्शयति । ( २,४.१० )

पञ्चवृत्तिर्मनोवत्व्यपदिश्यते । ( २,४.११ )

अणुश्च । ( २,४.१२ )

ज्योतिराद्यधिष्ठानं तु तदामननात्प्राणवता शब्दात्। ( २,४.१३ )

तस्य च नित्यत्वात्। ( २,४.१४ )

त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्। ( २,४.१५ )

भेदश्रुतेर्वैलक्षण्याच्च । ( २,४.१६ )

www.ayurvedah.in

**संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्। ( २,४.१७ )**

**मांसादि भौमं यथाशब्दमितरयोश्च । ( २,४.१८ )**

**वैशेष्यात्तु तद्वादस्तद्वादः । ( २,४.१९ )**

www.ayurvedah.in

# तृतीय अध्याय ( साधना )

## अध्याय ३: पाद-१

तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् । ( ३,१.१ )

त्र्यात्मकत्वात्तु भूयस्त्वात्। ( ३,१.२ )

प्राणगतेश्च । ( ३,१.३ )

अग्न्यादिश्रुतेरिति चेन्न भाक्तत्वात्। ( ३,१.४ )

प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः । ( ३,१.५ )

अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः । ( ३,१.६ )

भाक्तं वानात्मवित्त्वात्तथा हि दर्शयति । ( ३,१.७ )

कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च । ( ३,१.८ )

चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः । ( ३,१.९ )

आनर्थक्यमिति चेन्न तदपेक्षत्वात्। ( ३,१.१० )

सुकृतदुष्कृते एवेति तु बादरिः । ( ३,१.११ )

अनिष्टादिकारिणामपि च श्रुतम् । ( ३,१.१२ )

संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात्। ( ३,१.१३ )

स्मरन्ति च । ( ३,१.१४ )

अपि सप्त । ( ३,१.१५ )

www.ayurvedah.in

तत्रापि तद्व्यापारादविरोधः । ( ३,१.१६ )

विद्याकर्मणोरिति तु प्रकृतत्वात्। ( ३,१.१७ )

न तृतीये तथोपलब्धेः । ( ३,१.१८ )

स्मर्यतेऽपि च लोके । ( ३,१.१९ )

दर्शनाच्च । ( ३,१.२० )

तृतीयशब्दावरोधः संशोकजस्य । ( ३,१.२१ )

तत्स्वाभाव्यापत्तिरुपपत्तेः । ( ३,१.२२ )

नातिचिरेण विशेषात्। ( ३,१.२३ )

अन्याधिष्ठिते पूर्ववदभिलापात्। ( ३,१.२४ )

अशुद्धमिति चेन्न शब्दात्। ( ३,१.२५ )

रेतःसिग्योगोऽथ । ( ३,१.२६ )

योनेः शरीरम् । ( ३,१.२७ )

www.ayurvedah.in

## अध्याय ३: पाद-२

सन्ध्ये सृष्टिराह हि । ( ३,२.१ )

निर्मातारं चैके पुत्रादयश्च । ( ३,२.२ )

मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्। ( ३,२.३ )

पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ । ( ३,२.४ )

देहयोगाद्वा सोऽपि । ( ३,२.५ )

सूचकश्च हि श्रुतेराचक्षते च तद्विदः । ( ३,२.६ )

तदभावो नाडीषु तच्छ्रुतेरात्मनि च । ( ३,२.७ )

अतः प्रबोधोऽस्मात्। ( ३,२.८ )

स एव तु कर्मानुस्मृतिशब्दविधिभ्यः । ( ३,२.९ )

मुग्धेऽर्धसंपत्तिः परिशेषात्। ( ३,२.१० )

न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि । ( ३,२.११ )

भेदादिति चेन्न प्रत्येकमतद्वचनात्। ( ३,२.१२ )

अपि चैवमेके । ( ३,२.१३ )

अरूपवदेव हि तत्प्रधानत्वात्। ( ३,२.१४ )

प्रकाशवच्चावैयर्थ्यात्। ( ३,२.१५ )

आह च तन्मात्रम् । ( ३,२.१६ )

www.ayurvedah.in

**दर्शयति चाथो अपि स्मर्यते । ( ३,२.१७ )**

**अत एव चोपमा सूर्यकादिवत्। ( ३,२.१८ )**

**अम्बुवदग्रहणात्तु न तथात्वम् । ( ३,२.१९ )**

**वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं दर्शनाच्च । ( ३,२.२० )**

**प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः । ( ३,२.२१ )**

**तदव्यक्तमाह हि । ( ३,२.२२ )**

**अपि संराधने प्रत्यक्षानुमानाभ्याम् । ( ३,२.२३ )**

**प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात्। ( ३,२.२४ )**

**अतोऽनन्तेन तथा हि लिङ्गम् । ( ३,२.२५ )**

**उभयव्यपदेशात्त्वहिकुण्डलवत्। ( ३,२.२६ )**

**प्रकाशाश्रयवद्वा तेजस्त्वात्। ( ३,२.२७ )**

**पूर्ववद्वा । ( ३,२.२८ )**

**प्रतिषेधाच्च । ( ३,२.२९ )**

**परमतस्सेतून्मानसंबन्धभेदव्यपदेशेभ्यः । ( ३,२.३० )**

**सामान्यात्तु । ( ३,२.३१ )**

**बुद्ध्यर्थः पादवत्। ( ३,२.३२ )**

**स्थानविशेषात्प्रकाशादिवत्। ( ३,२.३३ )**

**उपपत्तेश्च । ( ३,२.३४ )**

तथान्यप्रतिषेधात्। ( ३,२.३५ )

अनेन सर्वगतत्वमायामशब्दादिभ्यः । ( ३,२.३६ )

फलमत उपपत्तेः । ( ३,२.३७ )

श्रुतत्वाच्च । ( ३,२.३८ )

धर्मं जैमिनिरत एव । ( ३,२.३९ )

पूर्वं तु बादरायणो हेतुव्यपदेशात्। ( ३,२.४० )

www.ayurvedah.in

## अध्याय ३: पाद-३

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्। ( ३,३.१ )

भेदान्नेति चेदेकस्यामपि । ( ३,३.२ )

स्वाध्यायस्य तथात्वे हि समाचारेऽधिकाराच्च सववच्च तन्नियमः । ( ३,३.३ )

दर्शयति च । ( ३,३.४ )

उपसंहारोरथाभेदाद्विधिशेषवत्समाने च । ( ३,३.५ )

अन्यथात्वं शब्दादिति चेन्नाविशेषात्। ( ३,३.६ )

न वा प्रकरणभेदात्परोवरीयस्त्वादिवत्। ( ३,३.७ )

संज्ञातश्चेत्तदुक्तमस्ति तु तदपि । ( ३,३.८ )

व्याप्तेश्च समञ्जसम् । ( ३,३.९ )

सर्वाभेदादन्यत्रेमे । ( ३,३.१० )

आनन्दादयः प्रधानस्य । ( ३,३.११ )

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे । ( ३,३.१२ )

इतरे त्वर्थसामान्यात्। ( ३,३.१३ )

आध्यानाय प्रयोजनाभावात्। ( ३,३.१४ )

आत्मशब्दाच्च । ( ३,३.१५ )

आत्मगृहीतिरितरवदुत्तरात्। ( ३,३.१६ )

अन्वयादिति चेत्स्यादवधारणात्। ( ३,३.१७ )

कार्याख्यानादपूर्वम् । ( ३,३.१८ )

समान एवं चाभेदात्। ( ३,३.१९ )

सम्बन्धादेवमन्यत्रापि । ( ३,३.२० )

न वा विशेषात्। ( ३,३.२१ )

दर्शयति च । ( ३,३.२२ )

संभृतिद्युव्याप्त्यपि चातः । ( ३,३.२३ )

पुरुषविद्यायामपि चेतरेषामनाम्नानात्। ( ३,३.२४ )

वेधाद्यर्थभेदात्। ( ३,३.२५ )

हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दस्स्तुत्युपगानवत्तदुक्तम् । ( ३,३.२६ )

सांपराये तर्तव्याभावात्तथा ह्यन्ये । ( ३,३.२७ )

छन्दत उभयाविरोधात्। ( ३,३.२८ )

गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः । ( ३,३.२९ )

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत्। ( ३,३.३० )

यावदधिकारमवस्थितिराधिकारिकाणाम् । ( ३,३.३१ )

अनियमस्सर्वेषामविरोधश्शब्दानुमानाभ्याम् । ( ३,३.३२ )

अक्षरधियां त्ववरोधस्सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् । ( ३,३.३३ )

इयदामननात्। ( ३,३.३४ )

www.ayurvedah.in

अन्तरा भूतग्रामवत्स्वात्मनोऽन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत्।

( ३,३.३५ )

व्यतिहारो विशिंषन्ति हीतरवत्। ( ३,३.३६ )

सैव हि सत्यादयः । ( ३,३.३७ )

कामादीतरत्र तत्र चाऽयतनादिभ्यः । ( ३,३.३८ )

आदरादलोपः । ( ३,३.३९ )

उपस्थितेऽतस्तद्वचनात्। ( ३,३.४० )

तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् । ( ३,३.४१ )

प्रदानवदेव तदुक्तम् । ( ३,३.४२ )

लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि । ( ३,३.४३ )

पूर्वविकल्पः प्रकरणात्स्यात्क्रियामानसवत्। ( ३,३.४४ )

अतिदेशाच्च । ( ३,३.४५ )

विद्यैव तु निर्धारणाद्दर्शनाच्च । ( ३,३.४६ )

श्रुत्यादिबलीयस्त्वाच्च न बाधः । ( ३,३.४७ )

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम् । ( ३,३.४८ )

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः । ( ३,३.४९ )

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः । ( ३,३.५० )

एक आत्मनः शरीरे भावात्। ( ३,३.५१ )

व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत्। ( ३,३.५२ )

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् । ( ३,३.५३ )

मन्त्रादिवद्वाविरोधः । ( ३,३.५४ )

भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति । ( ३,३.५५ )

नाना शब्दादिभेदात्। ( ३,३.५६ )

विकल्पोऽविशिष्टफलत्वात्। ( ३,३.५७ )

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात्। ( ३,३.५८ )

अङ्गेषु यथाश्रयभावः । ( ३,३.५९ )

शिष्टेश्च । ( ३,३.६० )

समाहारात्। ( ३,३.६१ )

गुणसाधारण्यश्रुतेश्च । ( ३,३.६२ )

न वा तत्सहभावाश्रुतेः । ( ३,३.६३ )

दर्शनाच्च । ( ३,३.६४ )

www.ayurvedah.in

## अध्याय ३: पाद-४

पुरुषार्थोऽतः शब्दादिति बादरायणः । ( ३,४.१ )

शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः । (३,४.२ )

आचारदर्शनात्। ( ३,४.३ )

तच्छ्रुतेः । ( ३,४.४ )

समन्वारम्भणात्। ( ३,४.५ )

तद्वतो विधानात्। ( ३,४.६ )

नियमात्। ( ३,४.७ )

अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्। ( ३,४.८ )

तुल्यं तु दर्शनम् । ( ३,४.९ )

असार्वत्रिकी । ( ३,४.१० )

विभागः शतवत्। ( ३,४.११ )

अध्ययनमात्रवतः । ( ३,४.१२ )

नाविशेषात्। ( ३,४.१३ )

स्तुतयेऽनुमतिर्वा । ( ३,४.१४ )

कामकारेण चैके । ( ३,४.१५ )

उपमर्दं च । ( ३,४.१६ )

ऊर्ध्वरेतस्सु च शब्दे हि । ( ३,४.१७ )

परामर्शं जैमिनिरचोदनाच्चापवदति हि । ( ३,४.१८ )

अनुष्ठेयं बादरायणस्साम्यश्रुतेः । ( ३,४.१९ )

विधिर्वा धारणवत्। ( ३,४.२० )

स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात्। ( ३,४.२१ )

भावशब्दाच्च । ( ३,४.२२ )

पारिप्लवार्था इति चेन्न विशेषितत्वात्। ( ३,४.२३ )

तथा चैकवाक्योपबन्धात्। ( ३,४.२४ )

अत एव चाग्नीन्धनाद्यनपेक्षा । ( ३,४.२५ )

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्। ( ३,४.२६ )

शमदमाद्युपेतस्स्यात्तथापि तु तद्विधेस्तदङ्गतया
तेषामप्यवश्यानुष्ठेयत्वात्। ( ३,४.२७ )

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्। ( ३,४.२८ )

अबाधाच्च । ( ३,४.२९ )

अपि स्मर्यते । ( ३,४.३० )

शब्दश्चातोऽकामकारे । ( ३,४.३१ )

विहितत्वाच्चाऽश्रमकर्मापि । ( ३,४.३२ )

सहकारित्वेन च । ( ३,४.३३ )

www.ayurvedah.in

सर्वथापि त एवोभयलिङ्गात्। ( ३,४.३४ )

अनभिभवं च दर्शयति । ( ३,४.३५ )

अन्तरा चापि तु तद्दृष्टेः । ( ३,४.३६ )

अपि स्मर्यते । ( ३,४.३७ )

विशेषानुग्रहश्च । ( ३,४.३८ )

अतस्त्व् इतरज्ज्यायो लिङ्गाच्च । ( ३,४.३९ )

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः । ( ३,४.४० )

न चाधिकारिकमपि पतनानुमानात्तदयोगात्। ( ३,४.४१)

उपपूर्वमपीत्येके भावमशनवत्तदुक्तम् ।( ३,४.४२ )

बहिस्तूभयथापि स्मृतेराचाराच्च । ( ३,४.४३ )

स्वामिनः फलश्रुतेरित्यात्रेयः । ( ३,४.४४ )

आर्त्विज्यमित्यौडुलोमिः तस्मै हि परिक्रीयते । ( ३,४.४५ )

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्। ( ३,४.४६ )

कृत्स्नभावात्तु गृहिणोपसंहारः । ( ३,४.४७ )

मौनवदितरेषामप्युपदेशात्। ( ३,४.४८ )

अनाविष्कुर्वन्नन्वयात्। ( ३,४.४९ )

ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात्। ( ३,४.५० )

एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ।( ३,४.५१ )

# चतुर्थ अध्याय ( फल )

## अध्याय ४: पाद-१

आवृत्तिरसकृदुपदेशात्। ( ४,१.१ )

लिङ्गाच्च । ( ४,१.२ )

आत्मेति तूपगच्छन्ति ग्राहयन्ति च । ( ४,१.३ )

न प्रतीके न हि सः । ( ४,१.४ )

ब्रह्मदृष्टिरुत्कर्षात्। ( ४,१.५ )

आदित्यादिमतयश्चाङ्ग उपपत्तेः । ( ४,१.६ )

आसीनः संभवात्। ( ४,१.७ )

ध्यानाच्च । ( ४,१.८ )

अचलत्वं चापेक्ष्य । ( ४,१.९ )

स्मरन्ति च । ( ४,१.१० )

यत्रैकाग्रता तत्राविशेषात्। ( ४,१.११ )

आप्रयाणात्तत्रापि हि दृष्टम् । ( ४,१.१२ )

तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्। ( ४,१.१३ )

इतरस्याप्येवमसंश्लेषः पाते तु । ( ४,१.१४ )

अनारब्धकार्ये एव तु पूर्वे तदवधेः । ( ४,१.१५ )

**अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्। ( ४,१.१६ )**

**अतोऽन्यापि ह्येकेषामुभयोः । ( ४,१.१७ )**

**यदेव विद्ययेति हि । ( ४,१.१८ )**

**भोगेन त्वितरे क्षपयित्वाथ संपद्यते । ( ४,१.१९ )**

www.ayurvedah.in

## अध्याय ४: पाद-२

वाङ्मनसि दर्शनाच्छब्दाच्च । ( ४,२.१ )

अत एव सर्वाण्यनु । ( ४,२.२ )

तन्मनः प्राण उत्तरात्। ( ४,२.३ )

सोऽध्यक्षे तदुपगमादिभ्यः । ( ४,२.४ )

भूतेषु तच्छ्रुतेः । ( ४,२.५ )

नैकस्मिन्दर्शयतो हि । ( ४,२.६ )

समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य । ( ४,२.७ )

तदापीतेः संसारव्यपदेशात्। ( ४,२.८ )

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः । ( ४,२.९ )

नोपमर्देनातः । ( ४,२.१० )

अस्यैव चोपपत्तेरूष्मा । ( ४,२.११ )

प्रतिषेधादिति चेन्न शारीरात्स्पष्टो ह्येकेषाम् । ( ४,२.१२ )

स्मर्यते च । ( ४,२.१३ )

तानि परे तथा ह्याह । ( ४,२.१४ )

अविभागो वचनात्। ( ४,२.१५ )

तदोकोग्रज्वलनं तत्प्रकाशितद्वारो

विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च। ( ४,२.१६ )

www.ayurvedah.in

**रश्म्यनुसारी । ( ४,२.१७ )**

**निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च । ( ४,२.१८ )**

**अतश्चायनेऽपि दक्षिणे । ( ४,२.१९ )**

**योगिनः प्रति स्मर्यते स्मार्ते चैते । ( ४,२.२० )**

www.ayurvedah.in

## अध्याय ४: पाद-३

अर्चिरादिना तत्प्रथितेः । ( ४,३.१ )

वायुमब्दादविशेषविशेषाभ्याम् । ( ४,३.२ )

तटितोऽधि वरुणः संबन्धात्। ( ४,३.३ )

आतिवाहिकास्तल्लिङ्गात्। ( ४,३.४ )

वैद्युतेनैव ततस्तच्छ्रुतेः । ( ४,३.५ )

कार्यं बादरिरस्य गत्युपपत्तेः । ( ४,३.६ )

विशेषितत्वाच्च । ( ४,३.७ )

सामीप्यात्तु तद्व्यपदेशः । ( ४,३.८ )

कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्। ( ४,३.९ )

स्मृतेश्च । ( ४,३.१० )

परं जैमिनिर्मुख्यत्वात्। ( ४,३.११ )

दर्शनाच्च । ( ४,३.१२ )

न च कार्ये प्रत्यभिसन्धिः । ( ४,३.१३ )

अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च । ( ४,३.१४ )

विशेषं च दर्शयति । ( ४,३.१५ )

www.ayurvedah.in

## अध्याय ४: पाद-४

संपद्याविर्भावः स्वेन शब्दात्। ( ४,४.१ )

मुक्तः प्रतिज्ञानात्। ( ४,४.२ )

आत्मा प्रकरणात्। ( ४,४.३ )

अविभागेन दृष्टत्वात्। ( ४,४.४ )

ब्राह्मेण जैमिनिरुपन्यासादिभ्यः । ( ४,४.५ )

चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः । ( ४,४.६ )

एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः । ( ४,४.७ )

संकल्पादेव तच्छ्रुतेः । ( ४,४.८ )

अत एव चानन्याधिपतिः । ( ४,४.९ )

अभावं बादरिराह ह्येवम् । ( ४,४.१० )

भावं जैमिनिर्विकल्पामननात्। ( ४,४.११ )

द्वादशाहवदुभयविधं बादरायणोऽतः । ( ४,४.१२ )

तन्वभावे सन्ध्यवदुपपत्तेः । ( ४,४.१३ )

भावे जाग्रद्वत्। ( ४,४.१४ )

प्रदीपवदावेशस्तथा हि दर्शयति । ( ४,४.१५ )

स्वाप्ययसंपत्योरन्यतरापेक्षमाविष्कृतं हि । ( ४,४.१६ )

जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च । ( ४,४.१७ )

प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः । ( ४,४.१८ )

विकारावर्ति च तथा हि स्थितिमाह । ( ४,४.१९ )

दर्शयतश्चैवं प्रत्यक्षानुमाने । ( ४,४.२० )

भोगमात्रसाम्यलिङ्गाच्च । ( ४,४.२१ )

अनावृत्तिः शब्दादनावृत्तिः शब्दात्। ( ४,४.२२ )

www.ayurvedah.in

**e-publication of www.ayurveda.in .**
**Online FREE in pdf format**

1. **Āyurveda books**
    a. Astanga Hridayam
    b. Astanga Samgraha
    c. Charaka Samhita
    d. Madhava nidanam
    e. Sarangadhara Samhita
    f. Sushruta Samhita
2. **Contemporary books**
    a. Agastiya Ratnapariksa
    b. Amarakosa
    c. Ashtadhyayi
    d. Garbhopanisat
    e. Gheranda Samhita
    f. Goraksa Shataka
    g. Hatyoga pradipika
    h. Kamasutra
3. **Other books**
    a. **Puranas**
    b. **upanishadas**

www.ayurvedah.in

## Other publications (Hard copy) Published or Marketed by aarsha, Jaipur and available on www.ayurveda.in

1. Tatvabodha Commentary (of Sivadas Sen) on Astanga hridaya **Rs 300/-**
2. Bhanumati Commentary (of Chakrapani dutta)on Sushruta Samhita **Rs 150/-**
3. Charakatatvapradipika Commentary (of Sivadas Sen) on Charaka Samhita **Rs 300/-**
4. Charakopaskara commentary (of Sivadas Sen) on Charaka Samhita **Rs 300/-**
5. Chanda in Ayurveda Samhita :student edition **Rs 175** ( original price Rs 300)
6. madhavaniadna Avavodha 2 :student edition **Rs 300** ( original price Rs 495)
7. madhavanidana Anusthana I :student edition **Rs 600** ( original price Rs 1095)
8. madhavanidana Anusthana II :student edition **Rs 700** ( original price Rs 1195)
9. Madhavanidana patha :student edition **Rs 500** ( original price Rs 895)

**aarsha, jaipur**

**Plot no. 4, Khandelwal nagar Extn,**
**Near Premnagar pulia, Agra Road,**
**Jaipur- 302031, Rajasthan**

www.ayurvedahi.in